कर्म्मिहरो मलघ्नो मेदकुष्ठहेति शालिहोत्रः । मेकाजादिति इन् । यथा चोक्तम् ।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता ।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः ॥"
मेद्यतीति वा मेदिनी इन्विदा स्निहि महादिस्वाश्विन् । इति तट्टीकायां भरतः ॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते । १ । ६ । ८३-८४ ।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ ।
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः ॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः ।
अभक्ष्या मृत्तिका तेन कारणेन मुनीश्वराः ॥"
अपि च । तत्रैव । ३ । १३ । ८ ।
"मधुकैटभयोर्म्मेदःसंयोगान्मेदिनी स्मृता ।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")
तस्या उत्पत्तिर्यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम् ।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम् ॥
अहो केचिद्वदन्तीति मधुकैटभमेदसा ।
बभूव वसुधाजन्म तद्विरुद्धमतं शृणु ॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा ।
आवां वध न यत्रोर्व्वी पयसा संवृतेति च ॥
तयोर्जीवनकालेन प्रत्यक्षा सा भवेत् स्फुटम् ।
ततो बभूव मेदश्च मरणस्यान्तरं तयोः ।
मेदिनीति च विख्यातिमुक्ता येस्त्वन्मतं शृणु ॥
जलधौता कृता पूर्व्वं वर्द्धिता मेदसा यतः ।
कथयामि च तज्जन्म सार्थकं सर्व्वसम्मतम् ॥
पुरा श्रुतं यत् श्रुत्युक्तं धर्म्मवक्त्राच्च पुष्करे ।
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम् ॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम् ।
स च प्रविष्टः सर्व्वेषां तल्लोम्नां विवरेषु च ॥
कालेन महता तस्मादभूव वसुधा मुने ! ।
प्रत्येकं प्रतिलोम्नाञ्च कूपेषु सा स्थिरा स्थिता ॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः ।
आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता ।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता ॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः ॥

मेदिनीद्रवः, त्रि, (मेदिन्याः द्रवः ।) धूलिः । इति त्रिकाण्डशेषः ॥

मेदुरः, त्रि, (मेद्यति स्निह्यतीति । मिद् + "भञ्जभासमिदो घुरच् ।" ३ । २ । १६१ । इति घुरच् ।) अतिशयस्निग्धः । तत्पर्य्यायः । सान्द्रस्निग्धः २ । इत्यमरः । ३।१।२० ॥ (यथा, गीतगोविन्दे ।१।१।
"मेघैर्म्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-र्नक्तं भीरुरयं त्वमेव तदिमं राधे ! गृहं प्रापय ॥")

मेदुरा, स्त्री, (मेदुर + टाप् ।) काकोली । इति राजनिर्घण्टः ॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः ॥)

मेदोजं, क्ली, (मेदसो जायते इति । जन् + डः ।) अस्थि । इति राजनिर्घण्टः ॥

मेदोद्भवा, स्त्री, (मेदाकुन्दयोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥

मेदोन्ध्रः पुं, (मेदोबहुलः अन्ध्रः ।) वर्णसङ्करजातिभेदः । इति जटाधरः ॥ (यथा, मनुः ।१०।४८।
"मेदोन्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ॥"
क्वचित् मेदान्ध्र इत्यपि पाठः ॥)

मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति । मेदस् + मतुप् । मस्य वः ।) मेदा । इति राजनिर्घण्टः ॥ (मेदोविशिष्टे, त्रि ॥)

मेध, ऋ ञ सङ्गमे मेधायाञ्च हिंसायाञ्च । इति कविकल्पद्रुमः ॥ (भ्वा० उभ०-वधे सक०-अन्यत्र अक०-सेट् ।) ऋ, अमिमेधत् । ञ, मेधति मेधते । इति दुर्गादासः ॥

मेधः, पुं, (मेध्यते वध्यते पश्वादिरत्रेति । मेध + घञ् ।) यज्ञः । इति जटाधरः ॥ (यथा, महाभारते । १ । १२३ । २६ ।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः ।
भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति ॥"
हविः । इति ऋग्वेदे । १० । १०० । ६ । मन्त्रभाष्ये सायणः ॥)

मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति । मेध् + "षिद्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इत्यङ् । टाप् ।) धारणावती बुद्धिः । इत्यमरः ।१।५।२॥ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ सङ्गमे मेधायां हिंसायाञ्च सङ्गमे मेधायां श्रेमत्वात् षरोरिदः आपबहुश्रुतविषयीकरणं धारणा यदुक्तं धारणा बुद्धेर्गुणविशेषः इति । इति भरतः ॥ * ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")
मेधाकरं औषधं यथा,—
"शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला ।
अभया च गुडूची च अटरूषकवाकुची ।
एतैरक्षसमैर्भागैर्घृतं प्रस्थं विपाचयेत् ॥
कण्टकार्य्या रसं प्रस्थं दत्त्वा च समन्वितम् ।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम् ॥"
इति गारुडे १९८ अध्यायः ॥ * ॥
मेधाकरगणो यथा । सतताध्ययनम् । तत्त्वज्ञानकथा । अन्यतन्त्रशास्त्रावलोकनम् । सद्विद्याचार्य्यसेवा च । इति पुराणम् ॥ (दक्षप्रजापतिकन्याविशेषः । यथा,—
"कीर्त्तिर्लक्ष्मी र्धृतिर्म्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥"
इति वह्निपुराणे गणभेदनामाध्याये ॥ धनम् । इति निघण्टुः । २ । १० ॥ "मिधृ मेधृ सङ्गमे च । चकारात् हिंसामेधयोश्च । मिधिः सङ्गमार्थः । इति माधवः । घञ् । सङ्गच्छतेऽनेन सर्व्वं तद्वता हिंस्यते वा तद्वान् चौरादिभिः घ्नन्ति चैवार्थकारणात् इति महाभारतम् ॥ यद्वा, मतौ धीयते अर्जयितव्यं रक्षितव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते । तत्र मतिशब्दे उपपदे धातोः घञर्थे कविधानम् इति कः । पृषोदरादित्वात् मतिशब्दस्य मेभावः ।"
इति तद्भाष्ये देवराजयज्वा ॥)

मेधाः, [स्] पुं, (मेधते इति । मेध् + असुन् ।) स्वायम्भुवमनुपुत्त्रः । यथा,—
"अग्निश्चाग्निबाहुश्च सहः सवन एव च ।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथि-र्वसुः ।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः ॥"
इति मात्स्ये ९ अध्यायः ॥

मेधाकृत्, स्त्री, (मेधां करोतीति । कृ + क्विप् ।) सितावरशाकम् । इति राजनिर्घण्टः ॥ मेधाकारके, त्रि ॥

मेधाजित्, पुं, (मेधां जितवानिति । जि + क्विप् ।) कात्यायनमुनिः । इति त्रिकाण्डशेषः ॥

मेधातिथिः, पुं, (मेधायाः धारणावद्बुद्धेरतिथिरिव ।) मनुसंहिताटीकाकृत् । मुनिविशेषः । यथा, श्रीभागवते । १ । १९ । १० ।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः ॥"
(प्रियव्रतपुत्त्रः स च शाकद्वीपाधिपतिः । यथा, श्रीमद्भागवते । ५ । २० । २४—२५ ।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रव्यपदेशकः । यस्य ह महासुरभिगन्धस्तद्द्वीपमनुवासयति । तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः ॥" * ॥ सप्तदश द्वापरयुगस्य व्यासः । यथा, देवीभागवते । १ । ३ । ३० ।
"मेधातिथिः सप्तदशे व्रती ह्यष्टादशे तथा ॥"
प्रजापतेः कर्द्दमस्य पुत्त्रः । यथा, मार्कण्डेये । ५३ । १५ ।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथापरः ॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः । यथा, मार्कण्डेये । ९४ । ८ ।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ।
सप्तर्षयोऽन्यः सवनस्तथान्यो हव्यवाहनः ॥"
नदीविशेषे, स्त्री । यथा, महाभारते । ३ । २२१ । २३ ।
"चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तथा ।
ताम्रावती वेत्रवती नद्यस्त्रिस्रोऽथ कौशिकी ॥")

मेधारुद्रः, पुं, (मेधया रुद्र इव ।) कालिदासः । इति त्रिकाण्डशेषः ॥

मेधावती, स्त्री, (मेधा देयत्वेन अस्ति अस्याः इति । मेधा + मतुप् । मस्य वः । ङीप् । मेधावर्द्धकत्वादस्यास्तथात्वम् ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ मेधाविशिष्टा च ॥

मेधाविनी, स्त्री, (मेधास्या अस्तीति । मेधा + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः । ततो ङीप् ।) ब्रह्मणः पत्नी । इति मेदिनी । ने, २०४ ॥

मेधावी, [न्] पुं, (मेधास्यास्तीति । मेधा + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति